# श्री अहोबिल मठम् आचार्य तनियन् श्लोका:

**श्रीमन्नारायणा**

कमप्याध्यं गुरुं वन्दे कमला गृह मेधिनम् |
प्रवक्ता छन्दसां वक्ता पञ्चरात्रस्य यस्स्वयम् ||



**श्री (तायार्)**

सहधर्मचरीं शौरेस्समंत्रित जगद्धिताम् |
अनुग्रहमयीं वन्दे नित्यमज्ञात निग्रहाम् ||

**श्री विश्वक्सेना (Aippasi, Pooraadam)**

वन्दे वैकुण्ठ सेनान्यं देवं सूत्रवतीसखम् |
यद्वेत्रशिखरस्पन्दे विश्वमेतद्व्यवस्थितम् ||

**श्री शठकोपन् (Vaikaasi, Visaagham)**

यस्य सारस्वतस्रोतो वकूळामोदवासितम् |
श्रुतीनां विश्रमायालं शठारिं तमुपास्महे ||

**श्री नाथमुनि (Aani, Anusham)**

नाथेन मुनिना तेन भवेयं नाथवानहम् |
यस्य नैगमिकं तत्वं हस्तामलकतां गतम् ||

**श्री पुण्डरीकाक्षा / उय्यक्कोंडार् (Chiththirai, Kruththikaa)**


नमस्याम्यरविन्दाक्षं नाथभावे व्यवस्थितम् |
शुद्धसत्वमयं शौरेरवतारमिवापरम् ||




**श्री राममिश्रा / मणक्काल् नम्बि (Maasi, Magham)**

अनुज्जित क्षमायोगं अपुण्यजन बाधकम् |
अस्पृष्टमदरागं तं रामं तुर्यमुपास्महे ||

V1.1




**श्री यामुनाचार्या / आळवन्दार् (Aadi, Uththiraadam)**

वीगाहे यामुनं तीर्थं साधु बृन्दावने स्थितम् |
निरस्त जीम्हगस्पर्शे यत्र कृष्ण: कृतादर: ||

**श्री महापूर्णर् / पेरियनम्बि (Maarghazhi, Kaettai)**

दयानिघ्नं यतीन्द्रस्य देशिकं पूर्णमाश्रये |
येन विश्वसृजो विष्णोरपूर्यत मनोरथ: ||

**श्री रामानुजा / श्रीभाष्यकारर् (Chiththirai, Thiruvaadhirai)**

यो नित्यमच्युत पदांबुजयुग्मरुक्म-
व्यामोहतस्तदितराणी तृनाय मेने |
अस्मद्गुरोर्भगवतोस्य दयैकसिन्धो:
रामानुजस्य चरणौ शरणं प्रपद्ये ||




**श्री एम्बार् / गोविंद भट्टर् (Thai, Punarvasu)**

रामानुज पदच्छाया गोविन्दाह्वानपायिनी |
तदायत्तस्वरूपा सा जीयान्मद्विश्रमस्थली ||

**श्री पराशर भट्टर् (Vaikaasi, Anusham)**

श्रीपराशरभट्टार्य: श्रीरङ्गेशपुरोहित: |

श्रिवत्साङ्कसुत: श्रीमान् श्रेयसे मेस्तु भूयसे ||

**श्री नञ्जीयर् (Panghuni, Uththiram)**

नमो वेदान्त वेद्याय जगन्मङ्गळहेतवे |

यस्य वागमृतासारपूरितं भुवनत्रयम् ||

**श्री नंपिळ्ळै (Kaarthikai, Kruththikaa)**

वेदान्तवेद्यामृतवारिराशे: वेदार्थसारामृत पूरमग्रयम् |
आदाय वर्षन्तमहं प्रपद्ये कारुण्यपूर्णं कलिवैरिदासम् ||

**श्री वडक्कु तिरूवीदि पिळ्ळै (Aani, Swaathi)**

श्रीकृष्णपादपादाब्जे नमामि शिरसा सदा |
यत्प्रसादप्रभावेन सर्वसिद्धिरभून्मम ||

**श्री श्रीरङ्गाचारियार (Chiththirai, Raevathi)**

श्रीकृष्णपादपादाब्ज लोलुपं सद्गुणार्णवम् |

श्रीरङ्गार्यमहं वन्दे द्रामिडाम्नायदेषिकम् ||

**श्री केसवाच्चार्यार् (Maasi, Punarvasu)**

श्रीरङ्गार्यगुरोस्सूनुं धीशमादिगुणार्णवम् |

केशवार्यगुरूं वन्दे द्रामिडाम्नायदेषिकम् ||

**श्री कमलावासर् (Purattaasi, ShravaNam)**

केशवार्यगुरोस्सूनुं धीशमादिगुणार्णवम् |
श्रीनिवासगुरूं वन्दे द्रामिडाम्नायदेषिकम् ||

**श्री केसवाच्चार्यार् (Purattaasi, Kaettai)**


श्रीरङ्गराज दिव्याज्ञा लब्ध साम्राज्यलांछनम् |

गुरूं द्रमिडवेदानां केशवार्यमुपास्महे ||

श्री:

## 1st Pattam Azhaghiyasinghar (Purattaasi, Kaettai)

श्रीमते आदिवण् शठकोप यतीन्द्र महादेशिकन्




केशवार्यकृपापात्रं धीशमादिगुणार्णवम् ।
श्री शठारियतीशानं देशिकेन्द्रमहं भजे ॥

प्रपद्ये निरवद्यानां निषद्यां गुणसम्पदाम् ।
शरणं भवभीतानां शठकोप मुनीश्वरम् ॥

## Azhaghiyasinghars (Pattam 1-8)

शठारिनारायण संयमीन्द्र परांकुश श्रीनिधि वण्शठारीन् ।
1 2 3 4 5
परांकुश श्रीशठकोपयोगि परांकुशां श्चादिगुरून् भजाम: ॥
6 7 8

## Azhaghiyasinghars (Pattam 9-13)

प्रणम्य नारायण वण्षठद्विशद् रमानिवासान् अनघान् मुनीश्वरान् ।
9 10 11
नमामि नारायणयोगितल्लजं तदादिमं वीररघूद्वहं गुरूम् ॥
12 13

## Azhaghiyasinghars (Pattam 14-17)

श्री नारायण कल्याण वीरराघव योगिनौ ।
14 15
शठजिद् वीररघुराट् वेदमौळि मुनीश्वरौ ॥
16 17

## Azhaghiyasinghars (Pattam 18-22)

नारायण श्रीनिवास वीरराघव योगिन: ।
18 19 20

पराङ्कुश मुनि श्रीमन्नारायण मुनीश्वरौ ॥
21 22


21st Pattam Azhagiyasingar

V1.1

**Azhaghiyasinghars (Pattam 23-24)**

वीरराघव योगिन्द्रं वीतरागशिखामणिम् |
23

पराङ्कुशयतीशान मुनिं चानिशमाश्रये ||

24

**25th Pattam Azhaghiyasinghar (Aadi, Swaathi)**

श्रीमते श्रीवण् शठकोप श्री श्रीनिवास यतीन्द्र महादेशिकन्

श्रीवासवीररघुवर्यपराङ्कुशादि
 रामानुजार्यमुनिभिर्गुरूसार्वभौमैः |
संप्रेक्षितं करुणया परिपूर्णबोधं
 श्रीश्रीनिवासयतिशेखरमाश्रयामः ||




**26th Pattam Azhaghiyasinghar (Aadi, Pooram)**

श्रीमते श्रीवण् शठकोप श्रीरङ्गनाथ यतीन्द्र महादेशिकन्

श्रीवीरराघव यतीन्द्र पराङ्कुशादि
 रामानुजार्य कमलानिधि योगिवर्यैः |
संप्रेक्षितं करुणया परिपूर्णबोधं
 श्री रङ्गनाथ यतिशेखरमाश्रयामः ||




**27th Pattam Azhaghiyasinghar (Vaikaasi, Avittam)**

श्रीमते श्रीवण् शठकोप श्री वीरराघव वेदान्त यतीन्द्र महादेशिकन्

श्रीश्रीनिवासयतिशेखरलब्धबोधं
 श्रीङ्गनाथयतिधुर्यपदाब्जभृङ्गम् |
श्रीवीरराघवमुनिश्रुतिमौलिसूरिं
 श्रीनाथभक्तिभरिताशयमाश्रयामः ||

## 28th Pattam Azhaghiyasinghar (AavaNi, Moolam)

श्रीमते श्रीवण् शठकोप श्री श्रीरङ्गनाथ शठकोप यतीन्द्र महादेशिकन्

श्रीवासरङ्गपतिवीररघूद्वहादि

वेदान्तसंयमिवरैर्गुरुसार्वभौमैः ।

संप्रेक्षितं करुणया परिपूर्णबोधं

श्रीरङ्गनाथ शठकोपमुनिं भजामः ॥

## 29th Pattam Azhaghiyasinghar (Chiththirai, Chithraa)

श्रीमते श्रीवण् शठकोप श्री पराङ्कुश यतीन्द्र महादेशिकन्

विध्यांभोधिपराङ्कुशाख्ययतिराद् श्रीवासरङ्गाधिप –

श्रीमद्वीररघूद्वहश्रुतिशिरो योगीश्वरैरन्वहम ।

रङ्गाधीशशठारिसंयमिवरैश्चालोकितं सादरं

विध्यावारिनिधिं पराङ्कुशयतींद्राख्यं मुनीन्द्रं भजे ॥

## 30th Pattam Azhaghiyasinghar (Maargazhi, Visaagham)

श्रीमते श्रीवण् शठकोप श्री श्रीनिवास वेदान्त यतीन्द्र महादेशिकन्

श्रीवासरङ्गपतिवीररघूद्वहादि –

वेदान्तदेशिकपराङ्कुशलक्ष्मणार्यैः ।

संप्रेक्षितं करुणया परिपूर्णबोधं

श्रीश्रीनिवास निगमान्तगुरुं भजामः ॥

**31st Pattam Azhaghiyasinghar (Kaarthigai, Magam)**
श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

श्रीरङ्गनाथ यतिवर्यकृपात्तबोधं
श्रीवासवेद शिखरार्य दयावलम्बम् |
वैराग्यभक्ति मुखसद्गुणसागरं श्री-
नारायणश्रुतिशिरोगुरुमाश्रयाम: ||

**32nd Pattam Azhaghiyasinghar (Chiththirai, Poorattaadhi)**
श्रीमते श्रीवण् शठकोप श्री वीरराघव यतीन्द्र महादेशिकन्

श्रीवासरङ्गपति वीररघूद्वहादि
वेदान्त मानिलयवेदशिरोयतीन्द्रै: |
संप्रेक्षितं करुणया परिपूर्णबोधं
श्रीवीरराघव यतीन्द्र गुरूं भजाम: ||

**33rd Pattam Azhaghiyasinghar (Purattaasi, Visaagham)**
श्रीमते श्रीवण् शठकोप श्री शठकोप यतीन्द्र महादेशिकन्




श्रीरङ्गनाथ शठकोप यतीन्द्रपाद-
पङ्केरुहप्रवणचित्तमुदारबोधम |
श्रीवीरराघव यतीन्द्र कृपावलम्बं
श्रीमच्छठारि यति शेखरमाश्रयाम: ||

**34th Pattam Azhaghiyasinghar** (Kaarthigai, Uththiraadam)

श्रीमते श्रीलक्ष्मीनृसिंह दिव्य पादुका सेवक श्रीवण् शठकोप श्री शठकोप रामानुज यतीन्द्र महादेशिकन्




श्रीमद्वीररघूद्वहश्रुतिशिरो रंगेशकार्यात्मज –
श्रीवासश्रुति मौळियोगी शठजिध्योगीश वीक्षास्पदम् |
विख्यातं शमधीद मादि सुगुनै राढ्यं विपश्चित्तमं
वन्दे श्री शठकोपलक्ष्मणमुनिं वैराग्यवाराकरम् ||

**35th Pattam Azhaghiyasinghar** (Vaikaasi, Kaettai)

श्रीमते श्रीवण् शठकोप श्री श्रीरङ्गनाथ यतीन्द्र महादेशिकन्

श्रीमच्छ्री वीररघ्वीट् श्रुतिमकुटगुरूत्तंसपादाब्जभृङ्गं
श्रीमच्छ्रीरंगभूभृच्छठमथनगुरोर्लब्धवेदान्तयुग्मम् |
श्रीमन्नारायणाध्य श्रुतिशिखरशठारातिरामानुजार्य –
प्रेक्षापात्रं भजामो गुरुवरमनघं रङ्गनाथं यतीन्द्रम् ||

**36th Pattam Azhaghiyasinghar** (Aadi, Pushyam)

श्रीमते श्रीवण् शठकोप श्री श्रीनिवास यतीन्द्र महादेशिकन्

श्रीनारायणवेदमौळियतिराट् पादारविन्दाश्रयं
ख्यातश्रीशठकोपदेशिकमनेर्लब्धागमान्तद्वयम् |
श्रिमद्ररङ्गधुरीण योगिचरणन्यस्तात्म रक्षाभरं
सेवे श्रीनिधि योगिवर्यमनघं निर्बाधबोधोदयम् ||

V1.1

**37th Pattam Azhaghiyasinghar (Maasi, Pushyam)**

श्रीमते श्रीवण् शठकोप श्री वीरराघव शठकोप यतीन्द्र महादेशिकन्


अस्त्यत्रैको विशेषो बुध इति शठजिल्लक्ष्मणाभ्यां मुनिभ्यां
येकीभूयोदिताभ्यामिव निरुपधिकं सादरं सद्गुरुभ्याम् |
वेदान्तद्वन्द्व मन्त्रत्रय विवृतिमुखे शिक्षितं क्षान्तिमुख्यै:
आढ्यं श्रीवीररघ्वीट् शठमथनगुरुं सम्यमीन्द्रं नमामि ||





**38th Pattam Azhaghiyasinghar (Thai, Thiruvaadhirai)**

श्रीमते श्रीवण् शठकोप श्री श्रीनिवास शठकोप यतीन्द्र महादेशिकन्

श्रीमच्छठारि शठजिध्यतिधुर्यवीर –
रघ्वीट् शठारियतिशेखर देशिकेन्द्रै: |
संप्रेक्षितं करुणया परिपूर्णबोधं
श्री श्रीनिवासशठकोपमुनिं भजाम: ||







V1.1

**39th Pattam Azhaghiyasinghar** **(Vaikaasi, BharaNi)**

श्रीमते श्रीवण् शठकोप श्री पराङ्कुश यतीन्द्र महादेशिकन्

श्री वीरराघव यतींद्र पदाब्जभृंङ्ग


श्रीमच्छठारि यतिवर्यकृपात्तबोधम् |

श्री श्रीनिवासशठजिध्यतिधुर्यवीक्षा –

पात्रं परांकुशयतींद्रगुरुं भजाम: ||

**40th Pattam Azhaghiyasinghar** **(Maarghazhi, Visaagham)**

श्रीमते श्रीलक्ष्मीनृसिंह दिव्य पादुका सेवक श्रीवण् शठकोप श्री रङ्गनाथ शठकोप यतीन्द्र महादेशिकन्




श्रीमच्छठारि यतिशेखर लबधबोधं


श्री रङ्गनाथयतिधुर्य कृपैक पात्रम् |

श्रीमत्परांकुशयतींद्रदयावलम्बं

श्री रङ्गनाथ शठकोप मुनिं भजाम: ||

**41st Pattam Azhaghiyasinghar** **(Maarghazhi, Poorattaadhi)**

श्रीमते श्रीवण् शठकोप श्री लक्ष्मीनृसिंह शठकोप यतीन्द्र महादेशिकन्





श्रीमच्छठारि शठकोप यतींद्र रङ्गि –

कार्यात्मजातमुनिभिर्गुरूसार्वभौमै: |

संप्रेक्षितं करुणया परिपूर्णबोधं

लक्ष्मीनृसिंहशठकोपमुनिं भजाम: ||

## 42nd Pattam Azhaghiyasinghar (Thai, Uththiraadam)




श्रीमते श्रीलक्ष्मीनृसिंह दिव्य पादुका सेवक श्रीवण् शठकोप श्री श्रीरङ्ग शठकोप यतीन्द्र महादेशिकन्


श्रीङ्गेश यतीन्दुना करुणयाऽसौ स्यादिति प्रेक्षितं

खयात श्रीनरसिंह कारिजमुनीट् पादांबुजेन्दिन्दिरम् |

दान्तिक्षान्तिदयादिभि: शुभगुणै र्भान्तं बुधाग्रेसरं

श्रीमद्रङ्गशठारियोगिनृपतिं श्रेयोनिधिं संश्रये ||

## 43rd Pattam Azhaghiyasinghar (Kaarthigai, Pooraadam)




श्रीमते श्रीवण् शठकोप श्री वीरराघव शठकोप यतीन्द्र महादेशिकन्


श्रीमच्छ्री रङ्गपृथ्वीश्वरशठरिपुणा संयमीन्द्रेण दृष्टं

न्यस्तात्मानं नृसिंहे नरहरिशठजिध्योगिनेतु: प्रसादात् |

प्राज्ञश्रीङ्ग कारिप्रभवयतिपते: प्राप्तलक्ष्मीनृसिंहा –

स्थानं सेवे यतीन्द्रं सकल गुणनिधिं वीररघ्वीट् शठारिम् ||

## 44th Pattam Azhaghiyasinghar (AavaNi, Hastham)




श्रीमते श्रीवण् शठकोप श्री वेदान्त देशिक यतीन्द्र महादेशिकन्

श्रीरङ्गनाथ शठकोप यतीन्द्र दृष्टं

लक्ष्मीनृसिंह शठजित्करुनैकपात्रम् |

श्रीरङ्गवीररघुराट् शठकोपहृध्यं

वेदान्तदेशिक यतीन्द्रमहं प्रपध्ये ||

**45th Pattam Azhaghiyasinghar** **(Kaarthigai, Uththirattaadhi)**

श्रीमते श्रीलक्ष्मीनृसिंह दिव्य पादुका सेवक श्रीवण् शठकोप श्री नारायण यतीन्द्र महादेशिकन्

श्रीमद् रङ्गशठारि संयमिवराल्लब्धागमान्तद्वयम्

श्रीमद्वीररगूद्व हाद्यशठजित् पादारविन्दाश्रयम् |

श्रीमद्वेदवतंस देशिकयते: कारुण्यवीक्षास्पदम्

सेवे रङ्गधुरीण शासनवशं नारायणं योगिनम् ||




**46th Pattam Azhaghiyasinghar** **(Aani, Magham)**

श्रीमते श्रीवण् शठकोप श्री रङ्गनाथ यतीन्द्र महादेशिकन्

वेदान्त देशिक यतीन्द्र कटाक्षलब्ध

त्रैय्यन्त सारमनवध्य गुणम् बुधाग्रयम् |

नारायणाध्य यतिधुर्य कृपाभिषिक्तम

श्रीङ्गनाथ यतिशेखरम् आश्रयाम: ||




# Visthaara (Detailed) Thaniyans (of Azhaghiyasinghars 2-24 Pattam)

**2nd Pattam Azhaghiyasinghar** **(AvaNi, Kaettai)**

श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

श्री शठारियतिशान पदपङ्कज षट्पदम् |

श्रीमन्नारायणमुनिं श्रये श्री भाष्यदेशिकम् ||

### 3rd Pattam Azhaghiyasinghar (Thai, ShravaNam)

श्रीमते श्रीवण् शठकोप श्री पराङ्कुश यतीन्द्र महादेशिकन्

श्रीमन्नारायण मुने: पदपङ्कज षट्पदम् |

परार्द्ध्यगुण संपन्नं पराङ्कुशमुनिं भजे ||

### 4th Pattam Azhaghiyasinghar (Maargazhi, Chithraa)

श्रीमते श्रीवण् शठकोप श्री श्रीनिवास यतीन्द्र महादेशिकन्

श्री पराङ्कुश योगीन्द्र चरणांबुजषट्पदम् |

श्रीनिवासमुनिं वन्दे श्रीभाष्यामृतसागरम् ||

### 5th Pattam Azhaghiyasinghar (Kaarthigai, Kruththikaa)

श्रीमते श्रीवण् शठकोप श्री सर्वतन्त्र स्वतन्त्र शठकोप यतीन्द्र महादेशिकन्

श्रीनृसिंह दयापात्रं परवादिगजाङ्कशम् |

सर्वतन्त्र स्वतन्त्रार्यं शठकोपमुनिं भजे ||

### 6th Pattam Azhaghiyasinghar (Thai, Poorattaadhi)

श्रीमते श्रीवण् शठकोप श्री शष्टपराङ्कुश यतीन्द्र महादेशिकन्

श्रीमच्छठारि मुनिपाद सरोजहंसं

श्रीमत्पराङ्कुश तपोधन लब्धबोधम् |

श्रीमन् नृसिंह वरदार्य दयावलम्बं

श्रीमत्पराङ्कुशमुनिं प्रणतोस्मि नित्यम् ||

**7th Pattam Azhaghiyasinghar (Vaigaasi, Visaagham)**
श्रीमते श्रीवण् शठकोप श्री शठकोप यतीन्द्र महादेशिकन्

श्री पराङ्कुश योगीन्द्र चरणाम्बुजशेखरम् |

समस्त शास्त्रपारीणं शठकोपमुनिं भजे ||

**8th Pattam Azhaghiyasinghar (Maarghazhi, Ashwini)**

श्रीमते श्रीवण् शठकोप श्री पराङ्कुश यतीन्द्र महादेशिकन्

शठकोप यतिश्रेष्ठ पदपङ्कज षट्पदम् |

सर्वशास्त्रार्थतत्त्वज्ञं पराङ्कुशमुनिं भजे ||

**9th Pattam Azhaghiyasinghar (Aani, Thiruvaadhirai)**
श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

श्रीमन् नृसिंहवरद पङ्कुश कृपाश्रयम् |

श्रीमन्नारायणमुनिं श्रये श्रीभाष्यदेशिकम् ||

**10th Pattam Azhaghiyasinghar (Vaikaasi, Visaagham)**
श्रीमते श्रीवण् शठकोप श्री शठकोप यतीन्द्र महादेशिकन्
वरदार्यगुरुत्तंस चरणाम्बुज षट्पदम् |
शठकोपमुनिं वन्दे शठारिप्रवणं सदा ||

**11th Pattam Azhaghiyasinghar (Aippasi, Moolam)**
श्रीमते श्रीवण् शठकोप श्री श्रीनिवास यतीन्द्र महादेशिकन्
परांकुश शठाराति पदाम्बोजैक धारकम् |
श्रीनिवासमुनिं वन्दे मादृशामपि तारकम् ||

**12th Pattam Azhaghiyasinghar (Purattaasi, Pooram)**

श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

श्रीपरांकुश योगीन्द्र श्रीनिवासपदाश्रयम् |

श्रीमन्नारायणमुनिं वन्दे वेदान्तदेशिकम् ||

**13th Pattam Azhaghiyasinghar (Aani, Utthiraadam)**

श्रीमते श्रीवण् शठकोप श्री वीरराघव यतीन्द्र महादेशिकन्

श्रीमन्नारायणमुने: पदपङ्कजहंसकम् |

वीरराघवयोगीन्द्रं वन्दे वरगुणाकरम् ||

**14th Pattam Azhaghiyasinghar (Aadi, Utthiraadam)**

श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

श्री वीरराघवमुने र्वरिवस्यैक जीवनम् |

समाश्रयेमहि श्रीमन्नारायण मुनीश्वरम् ||

**15th Pattam Azhaghiyasinghar (Thai, Chithraa)**

श्रीमते श्रीवण् शठकोप श्री कल्याण वीरराघव यतीन्द्र महादेशिकन्

श्रीनारायण योगीन्द्र पदाम्बोजैक जीवनम् |

भजे श्रिरङ्गकल्याण वीरराघव योगिनम् ||

**16th Pattam Azhaghiyasinghar (Maarghazhi, Mrughaseersham)**

श्रीमते श्रीवण् शठकोप श्री शठकोप यतीन्द्र महादेशिकन्

कल्याणराघवमुने: कृपापात्रं दयानिधिम् |

सर्वशास्त्रार्थ तत्त्वज्ञं शठकोपमुनिं भजे ||

**17th Pattam Azhaghiyasinghar (Purattaasi, Sadhayam)**

श्रीमते श्रीवण् शठकोप श्री वीरराघव वेदान्त यतीन्द्र महादेशिकन्

श्रीमन्नारायणमुनिं श्रीशठारिपदाश्रयम् |
श्री वीरराघवमुनिं वन्दे वेदान्तदेशिकम् ||

**18th Pattam Azhaghiyasinghar (Purattaasi, Aayilyum)**

श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

वीरराघव वेदान्त मुनिवर्य पदाश्रयम् |
श्रीमन्नारायणमुनिं श्रये श्रिभाष्यदेशिकम् ||

**19th Pattam Azhaghiyasinghar (Maasi, Magham)**

श्रीमते श्रीवण् शठकोप श्री श्रीनिवास यतीन्द्र महादेशिकन्

श्रीमन्नारायण मुने: पदपद्मसमाश्रयम् |
श्रीनिवासमुनिं वन्दे वेदान्तद्वयदेशिकम् ||

**20th Pattam Azhaghiyasinghar (Purattaasi, Moolam)**

श्रीमते श्रीवण् शठकोप श्री वीरराघव यतीन्द्र महादेशिकन्

श्रीनिवास मुनिश्रेष्ठलब्ध वेदान्तसंपदम् |
श्री वीरराघवमुनिं कल्याणगुणमाश्रये ||

**21st Pattam Azhaghiyasinghar (Panghuni, Hastham)**

श्रीमते श्रीवण् शठकोप श्री पराङ्कुश यतीन्द्र महादेशिकन्

वेदान्तोत्तर वीरराघव मुनेर्नारायणा श्रीनिधि-
श्रीमद्वीररघूद्वहाख्य यामिनां कल्याणवीक्षास्पदम् |
विज्ञातोभय वेदमौळिहृदयं विद्वच्छिरोभूषणं
वन्देयानुदिनं पराङ्कुशमुनिं वैराग्यभक्त्यन्वितम् ||



21st Pattam Azhagiyasingar

**22nd Pattam Azhaghiyasinghar (Aadi, RohiNi)**

श्रीमते श्रीवण् शठकोप श्रीमन्नारायण यतीन्द्र महादेशिकन्

विद्याम्बोधि पराङ्कुशाख्य मुनिराडंघ्रिद्वयीसंश्रितं

त्रय्यन्तामृत वर्षिणं तनुभृतां त्राणाय जातोदयम् |
क्षोण्यां ख्यातसमस्ततन्त्रकुशलं व्याख्यातृताशालिनं
श्रीनारायण योगिवर्य मनीशं कारुण्यपूर्णं भजे ||

**23rd Pattam Azhaghiyasinghar (Aani, Uththirattaadhi)**

श्रीमते श्रीवण् शठकोप श्री वीरराघव यतीन्द्र महादेशिकन्

वीरराघव वेदान्त नारायण पदाश्रयम् |
श्रीवीरराघवमुनिं संश्रये श्रितवत्सलम् ||

**24th Pattam Azhaghiyasinghar (Chiththirai, Punarvasu)**

श्रीमते श्रीवण् शठकोप श्री पराङ्कुश रामानुज यतीन्द्र महादेशिकन्

श्रीवीरराघवमुनि श्रुतिमौळिसूरि –
श्रीमत्पदाम्बुज समाश्रय लब्धसत्त्वम् |
श्रीवीरराघवमुनीन्द्र कृपावलम्बं

श्रीमत्पराङ्कुश यतीन्द्र मुनिं भजाम: ||

**Link to Audio of all Thaniyans →**

V1.1